Roll No. ..........................

Total No. of Pages : 8

Total No. of Questions : 28

# उत्तरमध्यमा द्वितीयखण्ड (12वीं) वार्षिक परीक्षा 2025-26

**विषय कोड : 1203**

## नव्यव्याकरणम्

**समय : 3 घण्टे** **पूर्णांक : 100**

निर्देश :— (*i*) सर्वे प्रश्नाः अनिवार्याः।

(*ii*) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः सन्ति।

(*iii*) प्रश्नानामुत्तराणि संस्कृतभाषायामेव दातव्यम्।

1. उचितविकल्पं चित्वा लिखत — 1×6=6

(क) 'लस्य' इति सूत्रम् वर्तते —

(अ) संज्ञासूत्रम्

(ब) विधिसूत्रम्

(स) अधिकारसूत्रम्

(द) अतिदेशसूत्रम्

(ख) 'बभूव' इत्यत्र लकारः विद्यते —

(अ) लट्लकारः

(ब) लिट्लकारः

(स) लोट्लकारः

(द) लृट्लकारः

(ग) आर्धधातुकसंज्ञा विधायकं सूत्रम् वर्तते –

(अ) सार्वधातुकार्धधातुकयोः

(ब) आर्धधातुकं शेषः

(स) आर्धधातुकस्येऽवलादेः

(द) अभ्यासे चर्च

(घ) 'जहि' इत्यत्र धातुः वर्तते –

(अ) जन्

(ब) जप्

(स) हन्

(द) अद्

(ङ) 'गद्यम्' इत्यत्र यत् प्रत्ययविधायकं सूत्रम् विद्यते –

(अ) गदमदचरयमश्चानुपसर्गे

(ब) शकिसहोश्च

(स) पोरदुपधात्

(द) अचो यत्

(च) 'बुधः' इत्यत्र प्रत्ययः अस्ति –

(अ) णिनि

(ब) ण्वुल्

(स) कन्

(द) कः

2. रिक्तस्थानानि पूरयत् – 1×6=6

(क) गद धातोरर्थ ........................... अस्ति।

(व्यक्तायां वाचि/सातत्य गमने)

(ख) भूतार्थवृत्तेर्धातो: ........................... स्यात्।

(लृङ्/लुङ्)

(ग) 'तुद' व्यथने इति धातु: ...........................।

(स्वरितेत:/उदाप्तेत:)

(घ) णिजन्तात् ........................... स्यात्कर्तृगामिनि क्रियाफले।

(परस्मैपदं/आत्मनेपदम्)

(ङ) पुत्रीयति इत्यत्र ........................... प्रत्यय:।

(क्यच्/क्यङ्)

(च) सोमेनेष्टवान्सोमयाजी इत्यत्र यज् धातो: ........................... प्रत्यय:।

(णिच्/णिनि)

3. उचितं युग्ममेलनं कुरुत : 1×6=6

(क) कुटिलं व्रजति – (क) बोभूयते

(ख) पुन: पुन: अतिशयेन वा भवति – (ख) क्यप्

(ग) शिष्य: – (ग) वाव्रज्यते

(घ) दिवादिभ्यः श्यन् — (घ) जागर्ति

(ङ) रुदादिभ्यः सार्वधातुके — (ङ) शपोऽपवादः

(च) जागृ निद्राक्षये — (च) वलादेः सार्वधातुकस्येट् स्यात्

4. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत — 7×1=7

(क) 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुक संज्ञा न भवति।

(ख) 'अभ्यास संज्ञा' 'पूर्वोऽभ्यासः' इत्यनेन विधीयते।

(ग) 'टुनदि' समृद्धौ इति धातुः भ्वादिगणे राजते।

(घ) क्रीणाति इत्यत्र 'डुकृञ्' करणे इति धातुः वर्तते।

(ङ) आतृतीयसमाप्तेरधिकारः धातोरिति सूत्रस्य।

(च) 'कार्यम्' इति प्रयोगः ण्यत् प्रत्ययान्तः।

(छ) 'दत्तः' इति प्रयोगः 'क्तवत्' प्रत्ययसंयोगात् निष्पद्यते।

5. एकपदेन उत्तरं लिखत — 7×1=7

(क) निष्ठा संज्ञा केन सूत्रेण भवति ?

(ख) 'तौ सत्' इत्यनेन कौ प्रत्ययौ विहितौ ?

(ग) लघुपधस्य अङ्गस्येको गुणः केन सूत्रेण भवति ?

(घ) 'कमु' कान्तौ इति धातोः लट्लकारे रूपमेकं लिखत।

(ङ) 'वध्यात्' इत्यत्र केन सूत्रेण वधादेशः ?

(च) 'तनोति' इति प्रयोगे 'उः' केन सूत्रेण भवति ?

(छ) 'मुण्डं करोति' इति विग्रहे रूपमेकं लिखत।

(अधोलिखितानां प्रश्नानामुत्तराणि 20 शब्देषु दातव्यम्)

6. 'प्रणिगदति' इत्यत्र नस्य णत्वविधायकं सूत्रं किम् ? 1×2=2

7. 'शेते' इत्यत्र केन सूत्रेण गुणः इति लिखत ? 1×2=2

8. 'मुञ्चति' इत्यत्र केन सूत्रेण नुम्स्यात् ? 1×2=2

9. 'संस्करोति' इत्यत्र 'सुट्' विधायकं सूत्रं लिखत ? 1×2=2

10. 'भावयति' इति प्रयोगे केन सूत्रेण णिच् प्रत्ययः ? 1×2=2

11. 'पुत्रकाम्यति' इत्यत्र 'काम्यच्' प्रत्ययः केन सूत्रेण भवति ? 1×2=2

12. 'अभिजानासि कृष्ण यद्वने अभुञ्ज्महि' इत्यत्र 'अभिज्ञावचने लृट्' इत्यनेन 'लृट्' कथं न भवति ? 1×2=2

13. 'कर्तरि कृत्' इति सूत्रस्य वृत्तिः यथाग्रन्थं लिखत। 1×2=2

14. 'ऋ' गतौ इत्यस्माद्धातोः यत् प्रत्यये कृते सति किं रूपमिति अर्थसहितं लिखत ? 1×2=2

15. 'ण्वुल्तृचौ' इत्यस्य उदाहरणद्वयं लिखत। 1×2=2

(अधोलिखितानां प्रश्नानामुत्तराणि 40 शब्देषु दातव्यम्)

16. 'गुपु' रक्षणे इति धातोः लट्लकारस्य रूपाणि लिखत। 1×3=3

अथवा

'भृञ्' भरणे इति धातोः लिट्लकारस्य रूपाणि लिखत।

17. 'जनी प्रादुर्भावे' इति धातोः लट्लकारस्य रूपाणि लिखत। 1×3=3

अथवा

'प्रच्छ ज्ञीप्सायाम्' इति धातो लिटि रूपाणि लिखत।

18. धूनोति चम्पकवनानि० इति कारिकां प्रपूरयत। 1×3=3

अथवा

'क्रीणाति' इति प्रयोगं साधयत।

19. 'लोहितश्यामदु:खानि०' इति कारिकां प्रपूरयत। 1×3=3

अथवा

'शब्दवैरकलह०' इति सूत्रं सवृत्तिकं सोदाहरणं च लिखत।

20. समाजः अथवा वाच्यम् इत्येतयोः प्रयोगमेकं साधयत। 1×3=3

21. वोढव्यः अथवा भव्यः इत्येतयोः प्रयोगमेकं साधयत। 1×3=3

(अधोलिखितानां प्रश्नानामुत्तराणि 80 शब्देषु दातव्यम्)

22. भवतु भवतात् इति प्रयोगं साधयत। 1×4=4

अथवा

अधुक्षत् इति प्रयोगं साधयत।

23. म्रियते इति प्रयोगं साधयत। 1×4=4

अथवा

वेदिता इति प्रयोगं साधयत।

24. 'इन्धे' इति प्रयोगं साधयत। 1×4=4

अथवा

'करोति' इति प्रयोगं साधयत।

25. 'स्थापयति' इति प्रयोगं साधयत। 1×4=4

अथवा

'नरीनृत्यते' इति प्रयोगं साधयत।

26. शत्रुघ्नः इति प्रयोगं साधयत। 1×4=4

अथवा

'जल्पाकः' इति प्रयोगं साधयत।

(अधोलिखितानां प्रश्नानामुत्तराणि 120 शब्देषु दातव्यानि)

27. अधोलिखितेषु प्रयोगेषु प्रकृतिं प्रत्ययञ्च पृथक् कुरुत : 1×5=5

(1) मृज्यः

(2) लाव्यग्

(3) एधितव्यम्

(4) जेयम्

(5) इत्यः

अथवा

पाय्यसांनाय्यनि० इति सूत्रं प्रपूर्य वृत्तिञ्च लिखत।

28. गोविन्दः, पतिहनी इति प्रयोगद्वयं साधयत। 1×5=5

अथवा

'क्षीणवान्' शीर्णः इति प्रयोगद्वयं साधयत।